**प्रश्नः-2 रेखांकितपदानि आधृत्य प्रश्ननिर्माणम् कुरुत-**

(क) <u>विभूढधीः</u> पक्वं फलं परित्यज्य अपक्वं फलं भुङ्क्ते।
(ख) संसारं <u>विद्वांसः</u> नेत्रवन्तः कथ्यन्ते।
(ग) <u>जनकेन</u> विद्या धनं दीयते।
(घ) <u>धैर्यवान्</u> लोके परिभवं म प्राप्नोति।
(ङ) पिता <u>पुत्राय</u> महत्-विद्या धनम् दीयते।
(च) आत्मकल्याणम् इच्छन् नरः <u>परेषाम्</u> अनिष्टं न कुर्यात्।

**प्रश्नः-3 श्लोकानाम् अन्वयम् उचितपद क्रमेण पूरयत-**

(क) पिता.................. बाल्ये महत् ........................ यच्छति। अस्य पिता कि तपः तेपे इत्युक्तिः ........................
(ख) येन ................ यत् प्रोक्तम् तस्य तत्वार्थस्य ........................ येन कर्तुं समर्थः भवेत् सः ........................ इति इरितः।
(ग) यः आत्मनः श्रेयः ................ सुखानि च इच्छति, सः परेभ्यः अहितं ............. कदापि च न ..............।

**प्रश्नः-4 विलोम-पदं लिखत-**

(क) पक्वः (ख) विमूढधीः
(ग) कातरः (घ) कृतज्ञता
(ङ) आलस्यम् (च) परूषा

**प्रश्नः-5 समानार्थकं पदं लिखत-**

(क) प्रभूतम् (ख) श्रेयः
(ग) चित्तम् (घ) मुखम्
(ङ) विमूदधीः (च) परूषम्
(छ) अकातरः (ज) चक्षुमन्तः

**प्रश्नः-6 विकल्पेभ्यः शुद्धोत्तराणि चित्वा लिखत-**

**(क) पिता पुत्राय बाल्ये किम् यच्छति?**
(i) विद्याधनम् (ii) तपोबलम्
(iii) तपः (iv) यच्छति

**(ख) 'कृतज्ञता' इति पदे कः प्रत्ययः**
(i) कृतज्ञ + तल् (ii) कृतज्ञ + टाप्
(iii) कृ + तव्यत् (iv) कृत + तव्यत्

**(ग) 'वाचि' इति पदे का विभक्तिः स्यात्**
(i) प्रथमा (i) सप्तमी
(iii) तृतीया (iv) पंचमी

**(घ) विमूढधीः किम् भुड.क्ते?**
(i) पक्वं फलम् (ii) अपक्वं फलम्
(iii) पक्वं अपक्वयं द्वयोः (iv) वाचम्

**(ड.) लोकेस्मिन् 'चक्षुष्मन्तः' के कथिताः?**
(i) छात्राः (ii) राजानः
(iii) विद्वांसः (iv) रिपवः

**(च) 'विमूढधीः' इति पदास्य विग्रहः अस्ति-**
(i) विमूढा धीः यस्य सः (ii) विमूढाधीः येन सः
(iii) विमूढाधीः यः सः (iv) विमूढाधीः धीः यः सः

**(छ) 'वदने' इत्यस्य समानार्थकः शब्दः अस्ति-**
(i) मुखे (ii) चक्षुः
(iii) वाचम् (iv) हस्ते

**(ज) 'परैर्न' इत्यस्य विच्छेदः अस्ति-**
(i) परैः + न (ii) न + परै
(iii) परै + न (iv) परैः + र्न

**(झ) केनापि इत्यस्य संधिविच्छेदः अस्ति-**
(i) केन + अपि (ii) केन + आपि
(iii) केना + पि (iv) के + अपि

**(ञ) 'श्रेयः' इत्यस्यार्थः अस्ति-**
(i) कल्याणम् (ii) अकल्याणम्
(iii) श्रय (iv) कातरः

## उत्तराणि (प्रश्न-कोषाणाम्)

**1. एकपदेन-**

(क) विद्याधनम् (ख) धर्मप्रदाम्
(ग) विद्वांसः (घ) सदाचारम्
(ङ) अहितम् (च) अवक्रता
(छ) आचारः (ज) पुत्राय
(झ) अवक्रता
(ञ) अपक्वम्

**2. प्रश्न-निर्माणम्-**

(क) कः. ................................?
(ख) के ................................?
(ग) केन ................................?
(घ) कः ................................?
(ङ) कस्मै ................................?
(च) केषाम् ................................?



Jharkhandlab.com

3. **अन्वयः**

(क) (i) पुत्राय (ii) विद्याधनम्
(iii) तत्कृतज्ञता

(ख) (i) केनापि (ii) निर्णयः
(iii) विवेकः

(ग) (i) प्रभूतानि (i) कर्म
(iii) कुर्यात्

4. **विलोम-पदम्-**

| | | | |
|---|---|---|---|
| (क) | अपक्वः | (ख) | सुधीः |
| (ग) | अकातरः | (घ) | कृतघ्नता |
| (ङ) | उद्यमः | (च) | कोमलम् |

5. **समानार्थकं पदम्-**

| | | | |
|---|---|---|---|
| (क) | अत्यधिकम् | (ख) | कल्याणम् |
| (ग) | मनः | (घ) | वदने |
| (ङ) | मूर्खः | (च) | कठोरम् |
| (छ) | निर्भीकः | (ज) | नेत्रवन्तः |

6. **विकल्पेभ्यः शुद्धोत्तराणि**

(क) (i) विद्याधनम्
(ख) (i) तल् प्रत्ययः
(ग) (ii) सप्तमी
(घ) (ii) अपक्वं फलम्
(ङ) (iii) विद्वांसः
(च) (i) विमुढा धीः यस्य सः
(छ) (i) मुखे
(ज) (i) परैः + न
(झ) (i) केन + अपि
(ञ) (i) कल्याणम्

Jharkhandlab.com

# दशमः पाठः भूकम्पविभीषिका

Jharkhandlab.com

**(प्रश्न-कोषः)**

**1. एकपदेन उत्तरं लिखत-**

क. कस्य दारुण-विभीषिका गुर्जरक्षेत्रं ध्वंसावशेषेषु परिवर्तितवती ?
ख. कीदृशानि भवनानि धाराशायीनि जातानि ?
ग. दुर्वार-जलधाराभिः किम् उपस्थितम् ?
घ. कस्य उपशमनस्य स्थिरोपायः नास्ति ?
ङ. कीदृशाः प्राणिनः भूकम्पेन निहन्यन्ते ?

**2. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**

क. समस्तराष्ट्रं कीदृशे उल्लासे मग्नम् आसीत् ?
ख. भूकम्पस्य केन्द्रबिन्दुः कः जनपदः आसीत् ?
ग. पृथिव्याः स्खलनात् किं जायते ?
घ. समग्रं विश्वं कैः आतङ्कितं दृश्यते ?
ङ. केषां विस्फोटैरपि भूकम्पो जायते ?

**3. रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(क) भूकम्पविभीषिका विशेषेण कच्छजनपदं ध्वंसावशेषेषु परिवर्तितवती।
(ख) वैज्ञानिकाः कथयन्ति यत् पृथिव्याः अन्तर्गर्भे, पाषाणशिलानां संघर्षणेन कम्पनं जायते।
(ग) विवशाः प्राणिनः आकाशे पिपीलिकाः इव निहन्यन्ते।
(घ) एतादृशी भयावहघटना गढ़वालक्षेत्रे घटिता।
(ङ) तदिदानीं भूकम्पकारणं विचारणीयं तिष्ठति।

**4. 'भूकम्पविषये' पञ्चवाक्यमितम् अनुच्छेदं लिखत।**

**5. कोष्ठकेषु दत्तेषु धातुषु निर्देशानुसारं परिवर्तनं विधाय रिक्तस्थानानि पूरयत-**

(क) समग्रं भारतं उल्लासे मग्नः __________ (अस् + लट् लकारे)
(ख) भूकम्पविभीषिका कच्छजनपदं विनष्टं __________ (कृ + क्तवतु + ङीप्)
(ग) क्षणेनैव प्राणिनः गृहविहीनाः __________ (भू + लङ, प्रथमः पुरुषः बहुवचनम्)
(घ) शान्तानि पञ्चतत्त्वानि भूतलस्य योगक्षेमाभ्यां __________ (भू + लट्, प्रथम प्रथम-पुरुषः बहुवचनम्)
(ङ) मानवाः __________ यत् बहुभूमिकभवननिर्माणं करणीयम् न वा? (पृच्छ् + लट्, प्रथम-पुरुषः बहुवचनम्)
(च) नदीवेगेन ग्रामाः तदुदरे __________ (सम् + आ + विश् + विधिलिङ, प्रथम पुरुषः एकवचनम्)

**6. सन्धिं/सन्धिविच्छेदं च कुरुत-**

**(अ) परसवर्णसन्धिनियमानुसारम्**

(क) किञ्च = __________ + च
(ख) __________ = नगरम् + तु
(ग) विपन्नञ्च = __________ + __________
(घ) __________ = किम् + नु
(ङ) भुजनगरन्तु = __________ + __________
(च) __________ = सम् + चयः

**(आ) विसर्गसन्धिनियमानुसारम्**

(क) शिशवस्तु = __________ + __________
(ख) __________ = विस्फोटैः + अपि
(ग) सहस्रशोऽन्ये = __________ + अन्ये
(घ) विचित्रोऽयम् = विचित्रः + __________
(ङ) __________ = भूकम्पः + जायते
(च) वामनकल्प एव = __________ + __________

**7(अ). 'क' स्तम्भे पदानि दत्तानि 'ख' स्तम्भे विलोमपदानि, तयोः संयोगं कुरुत-**

| क | ख |
|---|---|
| सम्पन्नम् | प्रविशन्तीभिः |
| ध्वस्तभवनेषु | सुचिरेणैव |
| निस्सरन्तीभिः | विपन्नम् |
| निर्माय | नवनिर्मितभवनेषु |
| क्षणेनैव | विनाश्य |

**7(आ). 'क' स्तम्भे पदानि दत्तानि 'ख' स्तम्भे समानार्थकपदानि, तयोः संयोगं कुरुत-**

| क | ख |
|---|---|
| पर्याकुलम् | नष्टाः |
| विशीर्णाः | क्रोधयुक्ताम् |
| उद्गिरन्तः | संत्रोट्य |
| विदार्य | व्याकुलम् |
| प्रकुपिताम् | प्रकटयन्तः |

**8 (अ). उदाहरणमनुसृत्य प्रकृति-प्रत्यययोः विभागं कुरुत-**

यथा- परिवर्तितवती – परि + वृत् + क्तवतु + ङीप् (स्त्री)
धृतवान् – ________ + ________
हसन् – ________ + ________
विशीर्णा – वि + श + क्त + ________
प्रचलन्ती – ________ + ________ + शतृ + ङीप् (स्त्री)
हतः – ________ + ________

**8(आ). पाठात् विचित्य समस्तपदानि लिखत-**

महत् च तत् कम्पनम् – ____________________
दारुणा च सा विभीषिका – ____________________
ध्वस्तेषु च तेषु भवनेषु – ____________________
प्राक्तने च तस्मिन् युगे – ____________________
महत् च तत् राष्ट्र तस्मिन् – ____________________

**उत्तराणि (प्रश्न-कोषाणाम्)**

**1. एकपदेन उत्तरं लिखत-**

क. भूकम्पस्य
ख. बहुभूमिकानि
ग. महाप्लावनदृश्यम्

घ. दैवीप्रकोपस्य/भूकम्पस्य
ङ. विवशाः

**2. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**

क. समस्तराष्ट्रं नृत्य-गीतवादित्राणाम् उल्लासे मग्नम् आसीत्।
ख. भूकम्पस्य केन्द्रबिन्दुः कच्छजनपदः आसीत्।
ग. पृथिव्याः स्खलनात् महाविनाशदृश्यं जायते।
घ. समग्रं विश्वं प्राकृतिकापदाभिः आतङ्कितं दृश्यते।
ङ. ज्वालामुखपर्वतानां विस्फोटैरपि भूकम्पो जायते।

**3. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(क) भूकम्पविभीषिका विशेषेण कच्छजनपदं केषु परिवर्तितवती?
(ख) के कथयन्ति यत् पृथिव्याः अन्तर्गर्भे पाषाणशिलानां संघर्षणेन कम्पनं जायते?
(ग) विवशाः प्राणिनः कुत्र/कस्मिन् पिपीलिकाः इव निहन्यन्ते?
(घ) कीदृशी भयावहघटना गढ़वालक्षेत्रे घटिता?
(ङ) तदिदानीं किं विचारणीयं तिष्ठति?

**4. 'भूकम्पविषये' पञ्चवाक्यमितम् अनुच्छेदं लिखत।**

(i) भूकम्पः एका प्राकृतिकी आपदा अस्ति।
(ii) यदा पृथिव्या अन्तर्गर्भे स्थितासु शिलासु संघर्षणं भवति तदा भूकम्पः जायते।
(iii) भूकम्पेन अपरिमित लावाराः धरातलात् निर्गत्य नदीवेगेन प्रवहन्तः ग्रामेषु नगरेषु वा महाविनाशं कुर्वन्ति।
(iv) भूकम्पेन अनेके विवशाः प्राणिनः निहन्यन्ते।
(v) अतः अस्माभिः प्रकृतेः विरुद्धानि कार्याणि न करणीयानि।
(vi) बहुभूमिकभवननिर्माणं नदीतटं बन्धान्, वृक्षाणां कर्तनं वा न करणीयम्।

**5. कोष्ठकेषु दत्तेषु धातुषु निर्देशानुसारं परिवर्तनं विधाय रिक्तस्थानानि पूरयत-**

(क) अस्ति
(ख) कृतवती
(ग) अभवन्
(घ) भवन्ति
(ङ) पृच्छन्ति
(च) समाविशेयुः

**6. सन्धिं/सन्धिविच्छेदं च कुरुत-**

**(अ) परसवर्णसन्धिनियमानुसारम्**

(क) किम्
(ख) नगरन्तु
(ग) विपन्नम् + च
(घ) किन्नु
(ङ) भुजनगरम् + तु
(च) सञ्चयः

**(आ) विसर्गसन्धिनियमानुसारम्**

(क) शिशवः + तु
(ख) विस्फोटैरपि
(ग) सहस्रशः
(घ) अयम्
(ङ) भूकम्पो जायते
(च) वामनकल्पः + एव

**7(अ). 'क' स्तम्भे पदानि दत्तानि 'ख' स्तम्भे विलोमपदानि, तयोः संयोगं कुरुत-**

| क | | ख |
|---|---|---|
| सम्पन्नम् | - | विपन्नम् |
| ध्वस्तभवनेषु | - | नवनिर्मितभवनेषु |
| निस्सरन्तीभिः | - | प्रविशन्तीभिः |
| निर्माय | - | विनाश्य |
| क्षणेनैव | - | सुचिरेणैव |

**(आ). 'क' स्तम्भे पदानि दत्तानि 'ख' स्तम्भे समानार्थकपदानि, तयोः संयोगं कुरुत-**

| क | | ख |
|---|---|---|
| पर्याकुलम् | - | व्याकुलम् |
| विशीर्णाः | - | नष्टाः |
| उद्गिरन्तः | - | प्रकटयन्तः |
| विदार्य | - | संत्रोट्य |
| प्रकुपिताम् | - | क्रोधयुक्ताम् |

**8(अ). उदाहरणमनुसृत्य प्रकृति-प्रत्यययोः विभागं कुरुत-**

यथा- परिवर्तितवती - परि + वृत् + क्तवतु + ङीप् (स्त्री)

| | |
|---|---|
| धृतवान् | - धृ + क्तवतु |
| हसन् | - हस् + शतृ |
| विशीर्णा | - वि + शृ + क्त + टाप् (स्त्री) |
| प्रचलन्ती | - प्र + चल् + शतृ + ङीप् (स्त्री) |
| हतः | - हन् + क्त |

**(आ). पाठात् विचित्य समस्तपदानि लिखत-**

| | |
|---|---|
| महत् च तत् कम्पनम् | - महत्कम्पनम् |
| दारुणा च सा विभीषिका | - दारुणविभीषिका |
| ध्वस्तेषु च तेषु भवनेषु | - ध्वस्तभवनेषु |
| प्राक्तने च तस्मिन् युगे | - प्राग्युगे |
| महत् च तत् राष्ट्रं तस्मिन् | - महद्राष्ट्रम् |

**अतिरिक्तसम्भावितप्रश्नाः-**

**1. पूर्णवाक्येन उत्तरत-**

क. 'पृथ्वी कस्मात् प्रकम्पते?' इति विषये वैज्ञानिकाः किं कथयन्ति ?

**2. रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(क) <u>धरां</u> विदार्य बहिर्निष्क्रामति।
(ख) <u>वैज्ञानिकाः</u> कथयन्ति।
(ग) <u>करुणकरुणं</u> क्रन्दन्ति स्म।
(घ) <u>भूमिः</u> फालद्वये विभक्ता।
(ङ) इयं <u>भूकम्पस्य</u> विभीषिका आसीत्।

**3. बहुविकल्पीयाः प्रश्नाः-**

**(i) गुजरातप्रान्ते कदा धरायाः महत्कम्पनं जातम् ?**

क. 2005 ईस्वीये  ख. 2001 ईस्वीये
ग. 2009 ईस्वीये  घ. 2003 ईस्वीये

**(ii) 'बहुभूमिकभवननिर्माणं न करणीयम्।' इति के कथयन्ति ?**

क. मानवाः  ख. चिकित्सकाः
ग. भूकम्परहस्यज्ञाः  घ. शिक्षकाः

jharkhandlab.com

(iii) **कानि शान्तानि एव भूतलस्य योगक्षेमाभ्यां कल्पन्ते ?**

क. भवनानि ख. पञ्चतत्वानि
ग. क्षेत्राणि घ. गगनानि

(iv) **ज्वालामुद्गिरन्त पर्वता अपि भीषणं कं जनयन्ति?**

क. खनिजं ख. भूकम्पं
ग. जलं घ. विस्फोटं

(v) **कश्मीरप्रान्ते कदा धराया: महत्कम्पनं जातम्?**

क. 2001 ईस्वीये ख. 2005 ईस्वीये
ग. 2010 ईस्वीये घ. 2012 ईस्वीये

4. **विकल्पेभ्यः समुचित-पर्याय-पदानि चित्वा लिखत-**

(i) **कुक्षौ**

क. उदरे ख. कक्षायां
ग. पर्यावरणे घ. भूमेः

(ii) **विचलनम्**

क. खनिजम् ख. पर्यावरणम्
ग. संस्खलनम् घ. कम्पनम्

(iii) **निर्गच्छन्तीभिः**

क. विशीर्णाः ख. निस्सरन्तीभिः
ग. गतिभिः घ. जलधाराभिः

(iv) **उत्पाटिताः**

क. उत्खाताः ख. उत्पाताः
ग. विदार्य घ. विशीर्णाः

(v) **उद्गिरन्तः**

क. विपन्नम् ख. प्रकटयन्तः
ग. वामनकल्पः घ. भूकम्पः

5. **समुचित-विलोमपदानि चित्वा लिखत-**

(i) **प्रसादः**

क. प्रकोपः ख. प्रासादः
ग. उत्खातः घ. दुर्वारः

(ii) **अविचलनम्**

क. खनिजम् ख. संस्खलनम्
ग. स्थिरम् घ. विपन्नम्

(iii) **मरणम्**

क. हसनम् ख. महाप्लावनम्
ग. विपन्नम् घ. जीवनम्

(iv) **विनाश्य**

क. निर्माय ख. निर्माणम्
ग. विभक्तः घ. विनाशः

(v) **व्यवस्थितम्**

क. विपर्यस्तम् ख. स्थिरम्
ग. विख्यातम् घ. विस्थापितम्

## उत्तराणि (प्रश्न-कोषाणाम्)

1. **पूर्णवाक्येन उत्तरत-**

(क) 'पृथ्वी कस्मात् प्रकम्पते?' इति विषये वैज्ञानिकाः कथयन्ति यत् पृथिव्या अन्तर्गर्भे विद्यमानाः पाषाण-शिलाः यदा संघर्षणवशात् त्रुट्यन्ति तदा भीषणं संस्खलनात् पृथिव्यां कम्पनं जायते।

2. **स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(क) कां विदार्य बहिर्निष्क्रामति?
(ख) के कथयन्ति?
(ग) कीदृशं क्रन्दन्ति स्म?
(घ) का फालद्वये विभक्ता?
(ङ) इयं कस्य विभीषिका आसीत्?

3. **बहुविकल्पीयाः प्रश्नाः-**

(i) (ख) 2001 ईस्वीये
(ii) (ग) भूकम्परहस्यज्ञाः
(iii) (ख) पञ्चतत्वानि
(iv) (ख) भूकम्पं
(v) (ख) 2005 ईस्वीये

4. **विकल्पेभ्यः समुचित-पर्याय-पदानि चित्वा लिखत-**

(i) क. उदरे
(ii) ग. संस्खलनम्
(iii) ख. निस्सरन्तीभिः
(iv) क. उत्खाताः
(v) ख. प्रकटयन्तः

5. **समुचित-विलोमपदानि चित्वा लिखत-**

(i) क. प्रकोपः
(ii) ख. संस्खलनम्
(iii) घ. जीवनम्
(iv) क. निर्माय
(v) क. विपर्यस्तम्

Jharkhandlab.com

# एकादशः पाठः — प्राणेभ्योऽपि प्रियः सुहृद्

**(प्रश्न-कोषः)**

1. **एकपदेन उत्तरं लिखत-**

(क) कः चन्दनदासं द्रष्टुम् इच्छति?
(ख) चन्दनदासस्य वाणिज्या कीदृशी आसीत्?
(ग) चाणक्यः कं द्रष्टुम् इच्छति?
(घ) कः शङ्कनीयः भवति?

2. **अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**

(क) चन्दनदासः कस्य गृहजनं स्वगृहे रक्षति स्म ?
(ख) तृणानां केन सह विरोधः अस्ति?
(ग) चाणक्यः कं द्रष्टुमिच्छति?
(घ) पाठेऽस्मिन् चन्दनदासस्य तुलना केन सह कृता?
(ङ) प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियं के इच्छन्ति?
(च) कस्य प्रसादेन चन्दनदासस्य वाणिज्या अखण्डिता?

3. **रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(क) <u>शिविना</u> विना इदं दुष्करं कार्यं कः कुर्यात् ।
(ख) प्राणेभ्योऽपि प्रियः <u>सुहृत्</u> ।
(ग) <u>आर्यस्य</u> प्रसादेन मे वाणिज्या अखण्डिता ।
(घ) प्रीताभ्यः प्रकृतिभ्यः <u>राजानः</u> प्रतिप्रियमिच्छन्ति ।
(ङ) <u>तृणानाम्</u> अग्निना सह विरोधो भवति ।

4. **यथानिर्देशमुत्तरत-**

(क) 'अखण्डिता मे वाणिज्या'- अस्मिन् वाक्ये क्रियापदं किम्?
(ख) पूर्वम् 'अनृतम्' इदानीम् आसीत् इति परस्परविरुद्धे वचने - अस्मात् वाक्यात् 'अधुना' इति पदस्य समानार्थकपदं चित्वा लिखत ।
(ग) 'आर्य! किं मे भयं दर्शयसि' अत्र' आर्य' इति सम्बोधनपदं कस्मै प्रयुक्तम् ?
(घ) 'प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः' अस्मिन् वाक्ये कर्तृपदं किम्?
(ङ) 'तस्मिन् समये आसीदस्मद्गृहे' अस्मिन् वाक्ये विशेष्यपदं किम्?

5. **निर्देशानुसारं सन्धिं/सन्धिविच्छेदं कुरुत-**

(क) यथा- कः + अपि - कोऽपि
प्राणेभ्यः + अपि - ---------
------- + अस्मि - सज्जोऽस्मि ।
आत्मनः + -------- - आत्मनोऽधिकारसदृशम्
(ख) यथा- सत् + चित् - सच्चित्
शरत् + चन्द्रः - --------
कदाचित् + च - ---------

6. **कोष्ठकेषु दत्तयोः पदयोः शुद्धं विकल्पं विचित्य रिक्तस्थानानि पूरयत-**

(क) --------- विना इदं दुष्करं कः कुर्यात्। (चन्दनदासस्य / चन्दनदासेन)
(ख) --------- इदं वृत्तान्तं निवेदयामि । ( गुरवे / गुरोः )
(ग) आर्यस्य ----------- अखण्डिता मे वणिज्या । (प्रसादात् / प्रसादेन )
(घ) अलम् --------- । (कलहेन / कलहात्)
(ङ) वीरः ---------- बालं रक्षति । ( सिंहेन / सिंहात्)
(च) ---------- भीतः मम भ्राता सोपानात् अपतत्। (कुक्कुरेण/ कुक्कुरात्)
(छ) छात्रः -------- प्रश्नं पृच्छति। (आचार्यम् / आचार्येण )

7. **अधोदत्तमञ्जूषातः समुचितविलोमपदानि गृहीत्वा लिखत-**

**( असत्यम्, पश्चात्, गुणः, आदरः, तदानीम्, तत्र )**

(क) अनादरः (ख) दोषः
(ग) पूर्वम् (घ) सत्यम्
(ङ) इदानीम् (च) अत्र

8. **उदाहरणमनुसृत्य अधोलिखितानि पदानि प्रयुज्य पञ्चवाक्यानि रचयत-यथा निष्क्रम्य - शिक्षिका पुस्तकालयात् निष्क्रम्य कक्षां प्रविशति ।**

(क) उपसृत्य (ख) प्रविश्य
(ग) द्रष्टुम् (घ) इदानीम्
(ङ) अत्र

**उत्तराणि**

1- **एकपदेन उत्तरं लिखत-**

क- चाणक्यः। ख- अखण्डिता।
ग- चन्दनदासं। घ- अत्यादरः।

2. **अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**

(क) चन्दनदासः अमात्यराक्षस्य गृहजनं स्वगृहे रक्षति।
(ख) तृणानां अग्निना सह विरोधः अस्ति।
(ग) चाणक्यः चन्दनदासं द्रष्टुमिच्छति।
(घ) पाठेऽस्मिन् चन्दनदासस्य तुलना शिविना सह कृता।
(ङ) प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियं राजान इच्छन्ति?
(च) चन्द्रगुप्तस्य प्रसादेन चन्दनदासस्य वाणिज्या अखण्डिता।

3. **रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(क) <u>केन</u> विना इदं दुष्करं कार्यं कः कुर्यात् ?
(ख) प्राणेभ्योऽपि प्रियः <u>कः</u> ?
(ग) <u>कस्य</u> प्रसादेन मे वाणिज्या अखण्डिता ?
(घ) प्रीताभ्यः प्रकृतिभ्यः <u>के</u> प्रतिप्रियमिच्छन्ति ?
(ङ) <u>केषाम्</u> अग्निना सह विरोधो भवति?

4. **यथानिर्देशमुत्तरत-**

(क) अखण्डिता
(ख) इदानीम्
(ग) चाणक्याय
(घ) राजानः
(ङ) गृहे

5. **निर्देशानुसारं सन्धिं/सन्धिविच्छेदं कुरुत-**

(क) यथा - कः + अपि - कोऽपि
प्राणेभ्योऽपि
सज्जः

Jharkhandlab.com

अधिकारसदृशम्
(ख) यथा- सत् + चित् - सच्चित्
शरच्चन्द्रः,
कदाचिच्च

6. **कोष्ठकेषु दत्तयोः पदयोः शुद्धं विकल्पं विचित्य रिक्तस्थानानि पूरयत-**

(क) चन्दनदासेन
(ख) गुरवे
(ग) प्रसादेन
(घ) कलहेन
(ङ) सिंहात्
(च) कुक्कुरात्
(छ) आचार्यम्

7. **अधोदत्तमञ्जूषातः समुचितविलोमपदानि गृहीत्वा लिखत-**

**( असत्यम्, पश्चात्, गुणः, आदरः, तदानीम्, तत्र )**

(क) अनादरः-आदरः (ख) दोषः-गुणः
(ग) पूर्वम्-पश्चात् (घ) सत्यम्-असत्यम्
(ङ) इदानीम्-तदानीम् (च) अत्र-तत्र

8. **उदाहरणमनुसृत्य अधोलिखितानि पदानि प्रयुज्य पञ्चवाक्यानि रचयत-**

**यथा निष्क्रम्य - शिक्षिका पुस्तकालयात् निष्क्रम्य कक्षां प्रविशति।**

(क) उपसृत्य (ख) प्रविश्य
(ग) द्रष्टुम् (घ) इदानीम्
(ङ) अत्र

(क) उपसृत्य - छात्रः गुरुम उपसृत्य तिष्ठति।
(ख) प्रविश्य - सः गृहं प्रविश्य कार्यं करोति।
(ग) द्रष्टुम् - रामः सीतां द्रष्टुम इच्छति।
(घ) इदानीम् - इदानीं मा गच्छ।
(ङ) अत्र - अत्र तिष्ठ।

## अतिरिक्तसम्भावितप्रश्नाः-

1. **एकपदेन उत्तरत-**

(क) चन्दनदासः कः आसीत् ?
(ख) राजप्रसादेन तस्य वाणिज्या कीदृशी ?
(ग) राजनि कीदृशः भव ?
(घ) अमात्यः कीदृशः आसीत् ?
(ङ) अस्मद् गृहे कस्य गृहजनः पूर्वम् आसीत ?

2. **बहुविकल्पीयाः प्रश्नाः-**

**समुचितविलोमपदानि चित्वा लिखत-**

(i) **प्रविश्य**
क. निष्क्रम्य ख. आगत्य
ग. गच्छन् घ. पठन्

(ii) **अप्रियम्**
क. सत्यम् ख. कठोरम्
ग. प्रियम् घ. मधुरम्

(iii) **सत्यम्**
क. मधुरम् ख. असत्यम्
ग. कोमलम् घ. हर्षितम्

(iv) **आयान्ति, आगच्छन्ति**
क. गच्छन्ति ख. अवगच्छन्ति
ग. उत्तिष्ठन्ति घ. नृत्यन्ति

(v) **सन्तम्**
क. सन्ति ख. असन्तम्
ग. ऋषिः घ. सज्जनः

3. **समुचितपर्यायपदानि चित्वा लिखत-**

(i) **मन्त्री**
क. अमात्यः ख. राजा
ग. आर्यः घ. जनता

(ii) **आच्छाद्य**
क. निष्क्रम्य ख. अलीकम्
ग. अमात्यः घ. पिधाय

(iii) **दुःखाभावः**
क. अपरिक्लेशः ख. असन्तम्
ग. अभावः घ. परिक्लेशः

(iv) **स्वगतम्**
क. स्वागतम् ख. आत्मगतम्
ग. अन्तर्गतम् घ. संवेदनम्

(v) **उपगम्य**
क. उपागमम् ख. अनुसृत्य
ग. उपसृत्य घ. परिक्रम्य

## अतिरिक्तसम्भावितप्रश्नाः- उत्तराणि

1. **एकपदेन उत्तरत-**

(क) मणिकारश्रेष्ठी (ख) अखण्डिता
(ग) अविरुद्धवृत्तिः (घ) राजापथ्यकारी
(ङ) अमात्यराक्षसस्य।

2. **बहुविकल्पीयाः प्रश्नाः-**

**समुचित-विलोमपदानि चित्वा लिखत-**

(i) क. निष्क्रम्य (ii) ग. प्रियम्
(iii) ख. असत्यम् (iv) क. गच्छन्ति
(v) ख. असन्तम्

3. **समुचितपर्यायपदानि चित्वा लिखत-**

(i) क. अमात्यः (ii) घ. पिधाय
(iii) क. अपरिक्लेशः (iv) ख. आत्मगतम्
(v) ग. उपसृत्य

jharkhandlab.com

# द्वादशः पाठः अन्योक्तयः

Jharkhandlab.com

**(प्रश्न-कोषः)**

1. **एकपदेन उत्तरं लिखत**
   - (क) कस्य शोभा एकेन राजहंसेन भवति?
   - (ख) सरसः तीरे के वसन्ति?
   - (ग) कः पिपासितः म्रियते?
   - (घ) के रसालमुकुलानि समाश्रयन्ते?
   - (ङ) अम्भोदाः कुत्र सन्ति?

2. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत -**
   - (क) सरसः शोभा केन भवति?
   - (ख) चातकः किमर्थं मानी कथ्यते?
   - (ग) मीनः कदा दीनां गतिं प्राप्नोति?
   - (घ) कानि पूरयित्वा जलदः रिक्तः भवति?
   - (ङ) वृष्टिभिः वसुधां के आर्द्रयन्ति?

3. **अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -**
   - (क) मालाकारः <u>तोयैः</u> तरोः पुष्टिं करोति।
   - (ख) भृङ्गाः <u>रसालमुकुलानि</u> समाश्रयन्ते।
   - (ग) <u>पतङ्गाः</u> अम्बरपथम् आपेदिरे।
   - (घ) <u>जलदः</u> नानानदीनदशतानि पूरयित्वा रिक्तोऽस्ति।
   - (ङ) चातकः <u>वने</u> वसति।

4. **अधोलिखितयोः श्लोकयोः भावार्थं स्वीकृतभाषया लिखत -**
   - (अ) तोयैरल्पैरपि .................. वारिदेन।
   - (आ) रे रे चातक .................. दीनं वचः।

5. **अधोलिखितयोः श्लोकयोः अन्वयं लिखत -**
   - (अ) आपेदिरे .............. कतमां गतिमभ्युपैति।।
   - (आ) आश्वास्य .............. सैव तवोत्तमा श्रीः।।

6. **उदाहरणमनुसृत्य सन्धिं/सन्धिविच्छेदं वा कुरुत-**

(i) **यथा - अन्य + उक्तयः = अन्योक्तयः ।**
   - (क) ............ + ............ = निपीतान्यम्बूनि
   - (ख) ............ + उपकारः = कृतोपकारः
   - (ग) तपन + ............ = तपनोष्णतप्तम्
   - (घ) तव + उत्तमा = ........................
   - (ङ) न + एतादृशाः = ........................

(ii) **यथा - पिपासितः + अपि = पिपासितोऽपि**
   - (क) ............ + ............ = कोऽपि
   - (ख) ............ + ............ = रिक्तोऽसि
   - (ग) मीनः + अयम् = ..............
   - (घ) सर्वे + अपि = ....................

(iii) **यथा - सरसः + भवेत् = सरसो भवेत्**
   - (क) खगः + मानी = ....................
   - (ख) ............ + नु = मीनो नु
   - (ग) पिपासितः + वा = ....................
   - (घ) ............ + ............ = पुरतो मा

(iv) **यथा - मुनिः + अपि = मुनिरपि**
   - (क) तोयैः + अल्पैः = ..............
   - (ख) .............. + अपि = अल्पैरपि
   - (ग) तरोः + अपि = ..............
   - (घ) .............. + आर्द्रयन्ति = वृष्टिभिरार्द्रयन्ति

7. **उदाहरणमनुसृत्य अधोलिखितैः विग्रहपदैः समस्तपदानि रचयत-**

**विग्रहपदानि - समस्त पदानि**

यथा- पीतं च तत् पङ्कजम् = पीतपङ्कजम्
   - (क) राजा च असौ हंसः = ............
   - (ख) भीमः च असौ भानुः = ............
   - (ग) अम्बरम् एव पन्थाः = ............
   - (घ) उत्तमा च इयम् श्रीः = ............
   - (ङ) सावधानं च तत् मनः, तेन = ............

**प्रश्नकोषः- उत्तराणि**

1. **एकपदेन उत्तरं लिखत**
   - (क) सरसः
   - (ख) बकसहस्रम्
   - (ग) चातकः
   - (घ) भ्रमराः
   - (ङ) गगने

2. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत -**
   - (क) सरसः शोभाः राजहंसेन भवति।
   - (ख) चातकः केवलं पुरन्दरं याचते अथवा वने पिपासितो म्रियते।
   - (ग) यदा सरोवरः सङ्कोचमञ्चति तदा मीनः दीनां गतिं प्राप्नोति।
   - (घ) नानानदीनदशतानि पूरयित्वा जलदः रिक्तः भवति।
   - (ङ) केचित् अम्भोदाः वृष्टिभिः वसुधां आर्द्रयन्ति।

3. **अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -**
   - (क) मालाकारः कैः तरोः पुष्टिं करोति?
   - (ख) भृङ्गाः कानि समाश्रयन्ते?
   - (ग) के अम्बरपथम् आपेदिरे?
   - (घ) कः नानानदीनदशतानि पूरयित्वा रिक्तोऽस्ति?
   - (ङ) चातकः कुत्र वसति?

4. **अधोलिखितयोः श्लोकयोः भावार्थं स्वीकृतभाषया लिखत -**
   - (अ) तोयैरल्पैरपि .................. वारिदेन।
   - (आ) रे रे चातक .................. दीनं वचः।
   - (अ) भावार्थ- हे माली! भीषण ग्रीष्मकाल की गरमी से थोड़े से ही जल द्वारा आपके द्वारा करूणापूर्वक इस वृक्ष का जो पोषण किया गया, क्या वर्षाकालीन जल के चारो ओर से धाराओं को बरसाने से बादल के द्वारा वह पोषण किया

जा सकता है? अर्थात् नहीं! क्योंकि दिल से किया काम ही ज्यादा फलदायी होता है। मेहनत का फल ही मीठा होता है। दान का नहीं।

(आ) भावार्थ- हे मित्र चातक! ध्यान से क्षणभर सुनो। आकाश में अनेक मेघ है। सभी बरसने वाले नहीं है। कुछ वर्षा से गीला करते है व कुछ केवल गरजते है। अत: सबके सामने दीन वचन कहने का कोई लाभ नहीं है। अर्थात् माँगना भी सभी से नहीं, बल्कि दानवीरों एवं करुण हृदय वालों से ही चाहिए।

5. **अधोलिखितयोः श्लोकयोः अन्वयं लिखत -**

(अ) आपेदिरे ............... कतमां गतिमभ्युपैति।।

(आ) आश्वास्य ............... सैवतवोत्तमा श्रीः।।

(अ) पतङ्गा परितः अम्बरपथम् आपेदिरे, भृङ्गाः रसालमुकुलानि समाश्रयन्ते । सरः त्वयि सङ्कोचम् अञ्चति हन्त दीनदीनः मीनः नु कतमां गतिम् अभ्युपैतु।

(आ) तपनोष्णतप्तम् पर्वतकुलम् आश्वास्य उद्दामदावविधुराणि काननानि च नानानदीनदशतानि पूरयित्वा च हे जलद! यत् रिक्तः असि तव सा एव उत्तमा श्रीः ।

6. **उदाहरणमनुसृत्य सन्धिं/सन्धिविच्छेदं वा कुरुत**

**यथा- अन्य + उक्तयः = अन्योक्तयः**

(i) (क) निपीतानि + अम्बूनि = निपीतान्यम्बूनि

(ख) कृत + उपकारः = कृतोपकारः

(ग) तपन + उष्णतप्तम् = तपनोष्णतप्तम्

(घ) तव + उत्तमा = तवोत्तमा

(ङ) न + एतादृशाः = नैतादृशाः

(ii) (क) कः + अपि = कोऽपि

(ख) रिक्तः + असि = रिक्तोऽसि

(ग) मीनः + अयम् = मीनोऽयम्

(घ) सर्वे + अपि = सर्वेऽपि

(iii) (क) खगः + मानी = खगो मानी

(ख) मीनः + नु = मीनो नु

(ग) पिपासितः + वा = पिपासितो वा

(घ) पुरतः + मा = पुरतो मा

(iv) (क) तोयैः + अल्पैः = तोयैरल्पैः

(ख) अल्पैः + अपि = अल्पैरपि

(ग) तरोः + अपि = तरोरपि

(घ) वृष्टिभिः + आर्द्रयन्ति = वृष्टिभिरार्द्रयन्ति

7. **उदाहरणमनुसृत्य अधोलिखितैः विग्रहपदैः समस्तपदानि रचयत-**

| | विग्रहपदानि - | समस्त पदानि |
|---|---|---|
| (क) | राजा च असौ हंसः = | राजहंसः |
| (ख) | भीमः च असौ भानुः = | भीमभानुः |
| (ग) | अम्बरम् एव पन्थाः = | अम्बरपथम् |
| (घ) | उत्तमा च इयम् श्रीः = | उत्तमश्रीः |
| (ङ) | सावधानं च तत् मनः, तेन = | सावधानमनसा |

## अतिरिक्तसम्भावितप्रश्नाः

1. **एकपदेन उत्तरत-**

(क) केन सरसः शोभा न भवेत् ?

(ख) राजहंसेन कानि निपीतानि?

(ग) कस्य कृतोपकारः भविता?

(घ) तरोः तादृशी पृष्टि केन कर्तुं न शक्या ?

(ङ) कः दीनहीनः मानितः ?

2. **पूर्णवाक्येन उत्तरत-**

(क) गगने बहवः के सन्ति?

(ख) चातक! कियत् कालं यावत् श्रूयताम्?

(ग) कः रिक्तः अपि शोभते?

(घ) चातकः कं याचते?

(ङ) वने मानी खगः कः वसति?

3. **विशेषणविशेष्ययोः समुचितं मेलनं कुरुत-**

| | विशेषणम् | - | विशेष्यम् |
|---|---|---|---|
| (क) | मानी | - | कृत्येन |
| (ख) | दीनहीनः | - | खगः |
| (ग) | केन | - | शोभा |
| (घ) | निषेवितानि | - | मीनः |
| (ङ) | या | - | नालिनानि |

4. **बहुविकल्पीयाः प्रश्नाः**

**समुचितपर्यायपदानि चित्वा लिखत-**

(i) **भ्रमराः**

क. भृङ्गाः  ख. काकः
ग. मीनाः  घ. राजहंसाः

(ii) **इन्द्रम्, सुरपतिम् .**

क. अमात्यः  ख. नृपः
ग. पुरन्दरम्  घ. वाराम्

(iii) **वनानि**

क. हरितानि  ख. निपीतानि
ग. काननानि  घ. नलिनानि

(iv) **मेघाः**

क. अम्भोदाः  ख. सरसः
ग. अम्बूनि  घ. मीनः

(v) **धराम्.**

क. वाराम्  ख. वसुधाम्
ग. वसुधा  घ. परितः

## अतिरिक्तसम्भावितप्रश्नाः- उत्तराणि

(क) बकसहस्त्रेण  (ख) अम्बूनि
(ग) सरोवरस्य  (घ) वारिदेन
(ङ) मीनः

2. **पूर्णवाक्येन उत्तरत-**

(क) गगने बहवः अम्भोदाः सन्ति।

(ख) चातक! क्षणं श्रूयताम्।

(ग) काननादीनि पूरयित्वा जलदः रिक्तः अपि शोभते।

(घ) चातकः पुरन्दरं याचते।

(ङ) वने मानी खगः चातकः वसति ।

3. **विशेषणविशेष्ययोः समुचितं मेलनं कुरुत-**

Jharkhandlab.com

विशेषणम् - विशेष्यम्

| | | | |
|---|---|---|---|
| (क) | मानी | – | खगः |
| (ख) | दीनहीनः | - | मीनः |
| (ग) | केन | - | कृत्येन |
| (घ) | निषेवितानि | - | नलिनानि |
| (ङ) | या | – | शोभा |

**4. बहुविकल्पीयाः प्रश्नाः**

**समुचितपर्यायपदानि चित्वा लिखत-**

(i) क. भृङ्गाः

(ii) ग. पुरन्दरम्

(iii) ग. काननानि

(iv) क. अम्भोदाः

(v) ख. वसुधाम्

Jharkhandlab.com

# JAC वार्षिक माध्यमिक परीक्षा - 2023

## विषय - संस्कृत

### बहुवैकल्पिक प्रश्नोत्तर

**वस्तुनिष्ठ प्रश्न**

**कुल प्रश्नों की संख्या : 19**

Total No. of Questions: 19

**पृष्ठों की कुल संख्या: 16**

Total No. of Pages : 16

**पूर्णांक : समय: 1 घंटा 30 मिनट**

Full Marks: 40 Time: 1 Hr. 30 Min.

**सामान्य निर्देश : GENERAL INSTRUCTIONS:**

1. **प्रश्न पुस्तिका - (B)** के प्रश्न विषयनिष्ठ हैं। यह प्रश्न- सह उत्तर-पुस्तिका है। **प्रश्न पुस्तिका - (A)** (बहुविकल्पीय) का उत्तर देने के बाद ही परीक्षार्थी प्रदत्त स्थान पर प्रश्न-सह- उत्तर-पुस्तिका **प्रश्न पुस्तिका (B)** में उत्तर दें।
2. परीक्षार्थी यथासंभव अपने शब्दों में उत्तर दें।
3. कुल प्रश्नों की संख्या 19 है।
4. प्रश्न संख्या 1 से 7 तक अति लघूत्तरीय प्रश्न हैं। इनमें से किन्हीं पाँच प्रश्नों के उत्तर दें। प्रत्येक प्रश्न का मान 2 अंक निर्धारित है।
5. प्रश्न संख्या 8 से 14 तक लघुत्तरीय प्रश्न हैं। इनमें से से किन्हीं पाँच प्रश्नों के उत्तर दें। प्रत्येक प्रश्न का मान 3 अंक निर्धारित है।
6. प्रश्न संख्या 15 से 19 तक दीर्घ उत्तरीय प्रश्न हैं। इनमें से किन्हीं तीन प्रश्नों के उत्तर दें। प्रत्येक प्रश्न का मान 5 अंक निर्धारित है।
7. परीक्षा के उपरांत **प्रश्न पुस्तिका (B)** (प्रश्न-सह- उत्तर-पुस्तिका) वीक्षक को लौटा दीजिए।

**सामान्य निर्देशाः**

सर्वे प्रश्नाः अनिवार्याः सन्ति।

प्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृते एव देयानि। प्रश्न संख्या 1 तः 7 पर्यन्तम् अति लघुत्तरीयाः प्रश्नाः, अस्य कृते 2-2 अंकौ निर्धारितौ। केचन पञ्चानां प्रश्नानाम् उत्तराणि लेखितव्यानि।

प्रश्न-संख्या 8 तः 14 पर्यन्तं लघुत्तरीयाः प्रश्नाः, अस्य कृते 3-3 अंकाः निर्धारिताः। केचन पञ्चानां प्रश्नानाम् उत्तराणि लेखितव्यानि।

प्रश्न-संख्या 15 तः 19 पर्यन्तं दीर्घोत्तरीयाः प्रश्नाः, अस्य कृते 5-5 अंकाः निर्धारिताः। केचन त्रयाणां प्रश्नानाम् उत्तराणि लेखितव्यानि।

अस्मिन् प्रश्न-पत्रे 40 ( चत्वारिंशत् ) प्रश्नाः सन्ति। प्रत्येकस्य प्रश्नस्य कृते 1 ( एकः ) अङ्क निर्धारितः अस्ति। प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत।

**खण्ड क ( अपठित-अवबोधनम् ) - 5**

निर्देशः अधोलिखितं गद्यांशं पठित्वा विकल्पेभ्यः उत्तराणि चित्वा लिखत-

"एकस्मिन् तरौ हंसकाकौ निवासं कृतवन्तौ। एकदा ग्रीष्मर्तौ परिश्रान्तः कश्चित् पथिकः धनुर्वाणं समीपे निधाय प्रसुप्तः। क्षणान्तरे तस्य मुखात् वृक्षच्छाया अपगता तन्मुखं तप्तम्। वृक्षावस्थितेन तेन हंसेन पक्षौ प्रसारितौ। तन्मुखे छाया कृता, लब्धनिद्रासुखेन पथिकेन उद्घाटितम्। परसुखम् असहिष्णुः काकः तस्य मुखे पुरीषोत्सर्गं कृत्वा पलायितः। उपरि निरीक्षितम्। तेन सः हंसः दृष्टः। पथिकः क्रुद्धः अभवत्, तेन वाणेन हंसः हतः।"

**1. हंसकाकौ कुत्र निवासं कृतवन्तौ ?**

(1) पर्वतशिखरे (2) सरोवरतटे
(3) तरौ (4) समुद्रतटे

**2. पथिकः कीदृशः आसीत् ?**

(1) परिश्रान्तः (2) पिपासितः
(3) प्रमुदितः (4) बुभुक्षितः

**3. केन पक्षौ प्रसारितौ ?**

(1) मयूरेण (2) हंसेन
(3) कपोतेन (4) वायसेन

**4. काकस्य स्वभावः कीदृशः आसीत् ?**

(1) सौहार्द्रपूर्णः (2) चञ्चलः
(3) करुणापरः (4) असहिष्णुः

**5. 'निधाय' इत्यस्मिन् पदे कः प्रत्ययः प्रयुक्तः ?**

(1) ल्यप् (2) क्तवतु
(3) तुमुन् (4) शानच्

**खण्ड ख (पठित-अवबोधनम् ) - 20**

**निर्देशः** अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत-

"विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन् चौरः गृहाभ्यन्तरं प्रविष्टः तत्र निहितामेकाम् मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धः अतिथिः चौरशंकया तमन्धावत् अगृहणात् च, परं विचित्रमघटत्। चौरः एवं उच्चैः क्रोशितुमारभत्। "चौरोऽयम् चौरोऽयम्" इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौरः आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।"

**6. गृहाभ्यन्तरे कः रात्रौ प्रविष्टः आसीत् ?**

(1) अहिः (2) मार्जारः
(3) चौरः (4) कपिः

**7. अतिथिः केन प्रबुद्धः ?**

(1) घोरनादेन (2) शिशुक्रन्दनेन
(3) कोलाहलेन (4) पादध्वनिना

Jharkhandlab.com

8. **चौरः काम् आदय पलायितः ?**

(1) पात्राणि (2) मंजूषाम्
(3) आभूषणानि (4) परिधानानि

9. **वस्तुतः चौरः कः आसीत् ?**

(1) ग्राम- आरक्षी (2) अतिथिः
(3) महाजनः (4) अर्चकः

10. **उच्चैः क्रोशितुं चौरः एव आरभत् ? अत्र कर्तृपदं किम् ?**

(1) आरभत् (2) उच्चैः
(3) चौरः (4) क्रोशितुम्

**निर्देशः** अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत -

**"आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।**
**नास्ति उद्यमसमो बन्धुः कृत्वा यं नावसीदति ।।"**

11. **मनुष्याणां शरीरस्थितः कः महान् रिपुः अस्ति ?**

(1) दुर्जनः (2) कामः
(3) उद्यमः (4) आलस्यम्

12. **उद्यमसमः कः नास्ति ?**

(1) बंधुः (2) धर्मः
(3) गुरुः (4) तृष्णा

13. **आलस्यम् केषां शत्रुः अस्ति ?**

(1) साधूनाम् (2) मनुष्याणाम्
(3) पक्षीणाम् (4) वन्यजीवानाम्

14. **'अवसीदति' इति पदस्य कः अर्थः ?**

(1) पलायते (2) सुखी भवति
(3) दुःखी भवति (4) प्रकुप्यति

15. **'महान् रिपुः' अनयोः पदयोः 'रिपुः' किम् अस्ति ?**

(1) अव्ययपदम् (2) विशेष्यपदम्
(3) उपमानः (4) सर्वनामपदम्

**निर्देशः** अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत

**चाणक्यः -** कथं न ज्ञायते नाम ? भो श्रेष्ठिन् । शिरसि भयम्, अतिदूरं तत्प्रतिकारः ।

**चन्दनदासः -** आर्य । किं मे भयं दर्शयसि ? सन्तमपि गेहे अमात्यराक्षसस्य गृहजने न समर्पयामि, किं पुनरसन्तम् ?

**चाणक्यः-** चन्दनदास ! एष एव ते निश्चयः ?

**चन्दनदासः -** बाढम् एष एव मे निश्चयः ?

**चाणक्यः -** (स्वगतम्) साधु । चन्दनदास साधु ।

**"सुलभेष्वर्थलाभेषु परसंवेदने जने ।**
**क इदं दुष्करं कुर्यादिदानीं शिविना विना ॥"**

16. **कः चन्दनदासाय भयं दर्शयति ?**

(1) चाणक्यः (2) स्कन्दगुप्तः
(3) चन्द्रगुप्तः (4) समाट् अशोकः

17. **अमात्यराक्षसस्य गृहजनं कः न समर्पयितुम् इच्छति ?**

(1) शिष्यः (2) महाराज नन्दः
(3) सुदर्शनः (4) चन्दनदासः

18. **चन्दनदासस्य तुलना केन अभवत् ?**

(1) पुलस्त्येन (2) भीष्म पितामहेन
(3) शिविना (4) अगस्त्येन

19. **'मंत्री' इत्यर्थे कः समानार्थकः शब्दः प्रयुक्तः ?**

(1) श्रेष्ठिन् (2) अमात्यः
(3) बाढम् (4) प्रतिकारः

20. **चन्दनदासस्य कः दुष्करम् आसीत् ?**

(1) वाणिज्यः (2) अभिमानः
(3) ज्ञानम् (4) निश्चयः

**निर्देशः** रेखांकितपदेषु प्रश्नवाचकपदानि विकल्पेभ्यः चित्वा लिखत -

21. **करुणापरो गृही तस्मै आश्रयं प्रायच्छत् ।**

(1) कम् (2) कस्यै
(3) कस्मै (4) केभ्यः

22. **स भारवेदनया क्रन्दति ।**

(1) कया (2) केन
(3) कस्मात् (4) कस्य

23. **तत्वार्थस्य निर्णयः विवेकेन कर्तुं शक्यः।**

(1) कथम् (2) कस्य
(3) कस्याः (4) कदा

24. **अरयः व्यायामिनं नोपसर्पन्ति ।**

(1) कुत्र (2) कयोः
(3) काभ्याम् (4) के

25. **तृणानाम् अग्निना सह विरोधो भवति ।**

(1) कदा (2) कीदृशम्
(3) केषाम् (4) केषु

### खण्ड ग -( अनुप्रयुक्तव्याकरणम् ) 15

**निर्देशः** अधोलिखितवाक्येषु रेखांकितपदानां संधिं/विच्छेदं वा चित्वा लिखत-

26. **अयं संसारः विचित्रः अस्ति ।**

(1) सम् + सरः (2) सत् + सारः
(3) सन् + सारः (4) सम् + सारः

27. **वट + छाया ग्रीष्मर्तौ शीतला भवति ।**

(1) वटन्छाया (2) वटच्छाया
(3) वटछाया (4) वटत्छाया

28. **देवर्षि नारदः मर्त्यलोकम् आगतः ।**

(1) देव + ऋषिः (2) देवाः + ऋषि
(3) देव + अर्षि (4) देव + ऋषयः

29. **अयं एकः रमणीयः सरोवरः अस्ति ।**

(1) सराः + वरः (2) सरो + वरः

Jharkhandlab.com

(3) सरः + वरः (4) सरः + वराः

**30. जगत् + नाथः विश्वस्य पालकः विद्यते।**

(1) जगन्नाथः (2) जगरनाथः
(3) जगलाथः (4) जगन्नाथाः

**निर्देशः** रेखाकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा समुचितं विकल्पं चित्वा लिखत -

**31. मार्गे गम् + शतृ कलहं मा कुरु।**

(1) गच्छन् (2) गत्वा
(3) गम्यमानः (4) गतवान्

**32. बालानां बौद्धिकः विकासः समुपेक्षते।**

(1) बुद्ध + इनि (2) बुद्ध + तमप्
(3) बुद्ध + ठक् (4) बुद्ध + मतुप्

**33. एतस्याः वाटिकायाः शोभा विचित्रा।**

(1) विचित्र + डाप् (2) विचित्र + टाप्
(3) विचित्र + चाप् (4) विचित्र + ङीप्

**34. सदाचारं यत्नेन रक्षितव्यम्।**

(1) रक्ष् + क्त (2) रक्ष् + अनीयर्
(3) रक्ष् + तुमुन् (4) रक्ष् + तव्यत्

**35. शिक्षया जनाः गुण + मतुप् जायन्ते।**

(1) गुणाढ्यः (2) गुणवता
(3) गुणवन्तः (4) गुणी

**निर्देश :** उचित-अव्ययपदं विकल्पेभ्यः चित्वा रिक्त- स्थानानि पूरयत-

**36. यत्र धूमः ........................ अग्निः अपि।**

(1) यदा (2) तंत्र
(3) अधुना (4) इव

**37. जलं ........................ जीवनम् असम्भवम्।**

(1) नूनम् (2) एव
(3) कथम् (4) विना

**38. वृक्षे कपयः ............... कूर्दन्ति।**

(1) बृथा (2) अत्र- तत्र
(3) इतस्ततः (4) यत्र

**39. अहं ...................... विद्यालयं न गमिष्यामि।**

(1) श्वः (2) चित्
(3) खलु (4) इव

**40. ...................... अयोध्यायाः नृपः दशरथः आसीत्।**

(1) कुतः (2) उच्चैः
(3) पुरा (4) मा

## विषयनिष्ठ प्रश्नोत्तत्राणि-

| | | |
|---|---|---|
| 1-(3) तरौ | 2-(1) परिश्रान्तः | 3-(2) हंसेन |
| 4.-(4) असहिष्णुः | 5.-(1) ल्यप् | 6.-(3)चौरः |
| 7.-(4) पादध्वनिना | 8.-(2) मञ्जूषाम् | 9.-(1) ग्राम-आरक्षी |
| 10.-(3) चौरः | 11.-(4) आलस्यम् | 12.-(1) बन्धुः |
| 13.-(2) मनुष्याणाम् | 14.-(3) दुखी भवति | 15.(2)विशेष्यपदम् |
| 16.-(1) चाणक्यः | 17.-(4) चन्दनदासः | 18.-(3) शिविना |
| 19.-(2) अमात्यः | 20.-(4) निश्चयः | 21.-(3) कस्मै? |
| 22.- (1) कया? | 23.-(2) कस्य? | 24.-(4) के? |
| 25.-(3) केषाम्? | 26.-(4) सम्+सारः | 7.-(2) वटच्छाया |
| 28. - (1) देव+ऋषिः | 29.-(3) सरः+वरः | 30.-(1) जगन्नाथः |
| 31.-(1) गच्छन् | 32.-(3) बुद्ध +ठक् | 33.-(2) विचित्र +टाप् |
| 34.-(4) रक्ष्+तव्यत् | 35.-(3) गुणवन्तः | 36. - (2) तत्र |
| 37.-(4) विना | 38.-(3) इतस्ततः | 39.-(1) श्वः |
| 40.-(3) पुरा। | | |

Jharkhandlab.com

# JAC वार्षिक माध्यमिक परीक्षा - 2023

## विषय - संस्कृत

### विषयनिष्ठ प्रश्न-सह-उत्तराणि-

**खण्ड क ( अति लघूत्तरीयाः प्रश्नाः )**

**निर्देशः** अधोलिखितं गद्यांशं श्लोकं नाट्यांशं च अधीत्य केवलं पञ्चप्रश्नानाम् उत्तराणि एव देयानि (5 x 2 = 10)

(क) गद्यांशः

कश्चिद् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् । तयोः बलीवर्दयोः एकः शरीरेण दुर्बल जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात । क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारं यत्नमकरोत् । तथापि वृषभः नोत्थितः । भूमौ पतिते स्वपुत्रं दृष्ट्वा धेनूनां माता सुरभिः नेत्राभ्याम् अश्रूणि आविरासन् ।

**पूर्णवाक्येन उत्तरत-**

**प्रश्न1. कृषकः किं करोति स्म ?** 2

**उत्तरम्-** कृषकः क्षेत्र - कर्षणं करोति ।

**प्रश्न 2. वलीवर्दयोः एकः कीदृशः आसीत् ?** 2

**उत्तरम्-** शरीरेण दुर्लभः आसीत् ।

**प्रश्न3. धेनूनां माता स्वपुत्रस्य कष्टं दृष्ट्वा किम् अकरोत् ?** 2

**उत्तरम्-** धेनुनाम् माता स्वपुत्रस्य कष्टं दृष्ट्वा नेत्रभायम् अश्रूणि आविरासन् ।

**(ख) श्लोकः**

**" एकेन राजहंसेन या शोभा सरसो भवेत् ।**
**न सा वकसहस्रेण परितस्तीरवासिना ।। "**

**पूर्णवाक्येन उत्तरत-**

**प्रश्न4. एकेन राजहंसेन कस्य शोभा भवति ?** 2

**उत्तरम्-** सरसः शोभा भवति।

**प्रश्न5. परितः तीरवासिना केन सरसः शोभा न भवति ?** 2

**उत्तरम्-** परितः तिरवासिना बकसहस्रेण सरसः शोभा न भवति ।

**(ग) नाट्यांशः**

कुशः अहमपि कुश इत्यात्मानं श्रावयामि ।
रामः अहो ! उदात्तरम्यः समुदाचारः । किं नामभवतोर्गुरुः ?
लवः ननु भगवान् वाल्मीकिः ।
रामः केन सम्बन्धेन ?
लवः उपनयनोपदेशेन ।
रामः अहमत्र भवतोः जनकः नामतो वेदितुमिच्छामि ।
लवः न हि जानाम्यस्य नामधेयम् । न कश्चिद् अस्मिन् तपोवने तस्य नाम व्यवहरति ।

**प्रश्न 6. लवकुशयोः गुरोः किं नामासीत् ?** 2

**उत्तरम्-** लवकुशयोः गुरोः नाम वाल्मीकिः आसीत् ।

**प्रश्न 7. कयोः जनकस्य नाम तपोवने कश्चिदपि न व्यवहरति ?** 2

**उत्तरम्-** लवकुशयोः जनकस्य नाम तपोवने कश्चिदपि न व्यवहरति ।

**खण्ड - ख ( लघूत्तरीयाः प्रश्नाः)**

**निर्देशः** अस्मिन् खण्डे केवलं पञ्चप्रश्नानाम् उत्तराणि देयानि (3 x 5 = 15)

**प्रश्न 8. अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा सम्पूरयत-** 3

**गुणी गुणं वेत्ति न वेत्ति निर्गुणः**
**बली बलं वेत्ति न वेत्ति निर्बलः ।**
**पिको वसन्तस्य गुणं न वायसः**
**करी च सिंहस्य बलं न मूषकः ।**

**अन्वयः -**

गुणी गुणं ........... (i) .........निर्गुणः न वेत्ति (जानाति) .......... (ii) ........... बलं वेत्ति निर्बलः न, बसन्तस्य गुणं ..................(iii) ................वेत्ति वायसः न, सिंहस्य बलं करी वेत्ति मूषकः न वेत्ति ।

**मञ्जूषा - (पिकः, वेत्ति, बली )**

**उत्तरम्-** (i) वेति (ii) बली (iii) पिकः

**9. अधोलिखितस्य श्लोकस्य भावार्थं मञ्जूषातः पदानि चित्वा लिखत-** 3

**"वयोबलशरीराणि देशकालाशनानि च ।**
**समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात् ।"**

**भावार्थः अस्ति यत् आयुः ..................(i)...................... स्थानं, कालं, भोजनानि च सम्यक् ..................(ii)......................... एव व्यायामः कर्तव्यः अन्यथा व्यायामेन ..................(iii)...................... अपि भवितुं शक्यन्ते।**

**मञ्जूषा- ( विचार्य, रोगाः, बलम् )**

**उत्तरम्-** (i) बलम् **(ii)** विचार्य (iii) रोगाः

**प्रश्न 10. अधोलिखित-दिनचर्यायां अंकानां स्थाने कालबोधकशब्दं लिखत-** 3

**(i) रजनीशः प्रातः (6 : 00) ........ वादने शय्यात्यागं करोति ।**
**(ii) सः प्रतिदिन (7 : 15) ........ बादने स्नात्वा देवालयं गच्छति।**
**(iii) सः सायंकाले (5 : 30) ........ वादने मित्रैः सह उद्याने भ्रमति ।**

**उत्तरम्-** (i) षड् (ii) सपाद-सप्त (iii) सार्ध-पञ्च

**प्रश्न11. वाच्यानुसारं समुचित-विकल्पं चित्वा रिक्तस्थानानि पूरयत-** 3

**(i) छात्राः ................ मनसा पठन्ति ।**

(क) पाठस्य (ख) पाठाः
(ग) पाठाय (घ) पाठान्

**(ii) मया तु दूरदर्शनं ..................।**

Jharkhandlab.com

| | | | |
|---|---|---|---|
| (क) | दृश्यते | (ख) | पश्यामि |
| (ग) | पश्यति | (घ) | पश्यति |

**(iii)** ............... **राष्ट्रगानं गायन्ति ।**

| | | | |
|---|---|---|---|
| (क) | बालको | (ख) | बालकाः |
| (ग) | बालकेभ्यः | (घ) | वालकैः |

**उत्तरम्-** (i) (ख) पाठान्      (ii) (क) दृश्यते      (iii) (ख) बालकाः

**प्रश्न12. अधोलिखितवाक्येषु रेखांकितपदानि संशोध्य लिखत- 3**

(i) <u>**वृक्षेण**</u> वायुवेगेन पत्राणि पतन्ति ।

(ii) इदं <u>**स्थानः**</u> अतीव सुरम्यं प्रतीयते ।

(iii) <u>**सः**</u> नारी अर्द्धरात्रौ कथं विलपति ?

**उत्तरम्-** (i) वृक्षात्   (ii) स्थानम्   (iii) सा

**प्रश्न13. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा विकल्पेभ्यः चित्वा लिखत - 3**

**(क) पुरन्दरः 'देवाधिपतिः' कथ्यते**

| | | | |
|---|---|---|---|
| (i) | देवानाम् अधिपतिः | (ii) | देवेभ्यः अधिपतिः |
| (iii) | देवेषु अधिपतिः | (iv) | देवस्य अभिपतिः |

**(ख) 'मक्षिकाणाम् अभावः' स्थानमिदम् ।**

| | | | |
|---|---|---|---|
| (i) | अधिमक्षिकम् | (ii) | निर्मक्षिकम् |
| (iii) | अभिमक्षिकम् | (iv) | बहुमक्षिकम् |

**(ग) 'रामलक्ष्मणौ' भ्रातरौ आस्ताम् ।**

| | | | |
|---|---|---|---|
| (i) | लक्ष्मणश्च रामः च | (ii) | रामश्च लक्ष्मणौ च |
| (iii) | रामो च लक्ष्मणो च | (iv) | रामश्च लक्ष्मणश्च |

**उत्तरम्-**

(क) (i) देवानाम् अधिपतिः   (ख) (ii) निर्मक्षिकम्

(ग) (iv) रामश्च लक्ष्मणश्च

**प्रश्न14. अधोलिखित-पदानां समानार्थकपदैः सह मेलनं कुरुत - 3**

| | A | | B |
|---|---|---|---|
| **(क)** | **रसालः** | **(i)** | **मुक्तः** |
| **(ख)** | **काननम्** | **(ii)** | **तीव्रगत्या** |
| **(ग)** | **चक्षुर्भ्याम्** | **(iii)** | **अचिरम्** |
| **(घ)** | **शीघ्रम्** | **(iv)** | **आम्रम्** |
| **(ङ)** | **स्वतन्त्रः** | **(v)** | **अरण्यम्** |
| **(च)** | **जवेन** | **(vi)** | **नेत्राभ्याम्** |

**उत्तरम्-**

| | | |
|---|---|---|
| (क) | रसालः | = आम्रम |
| (ख) | काननम् | = अरण्यम |
| (ग) | चक्षुर्भ्याम् | = नेत्राभ्याम् |
| (घ) | शीघ्रम् | = अचिरम् |
| (ङ) | स्वतंत्रः | = मुक्तः |
| (च) | जवेन | = तीव्रगत्या |

**खण्ड 'ग' ( दीर्घ उत्तरीयाः प्रश्नाः )**

**निर्देशः** अस्मिन् खण्डे केवलं त्रयाणां प्रश्नानाम् उत्तराणि लिखत- (5 x 3 = 15)

**प्रश्न15. अनुपस्थितिहेतोः प्रधानाध्यापकं प्रति लिखिते आवेदन-पत्रे रिक्तस्थानानि प्रदत्तशब्दसूचीसहायतया पूरयत- (10x1/2=5)**

................ **(i)**........................

प्रधानाध्यापक महोदयाः,

राजकीय उच्च विद्यालयः राँची ।

विषयः- अनुपस्थितिहेतोः क्षमायाचनायै आवेदन-पत्रम् ।

महाशयः,

सविनयं ..............(ii)...................... इदम् अस्ति यत् ......................(iii)................. ज्वरेण ............(iv).............. आसम् । अस्मात् ....................(v)................ अहं विद्यालयम् आगन्तुम् .........(vi).........अस्मि । वैद्येन पूर्णविश्रामं कर्तुं ..................(vii).................. अयच्छत् । अत एव त्रयाणां दिवसानां ............ (viii).................... प्रदाय अनुगृहणन्तु ...............(ix)................. । एतदर्थम् अहं भवताम् सदैव ऋणी भविष्यामि ।

धन्यवादाः ।      भवतः ..................(x)............... छात्रः

चन्द्रकान्तः

कक्षा दशमी, क्रमांकः 16.

**मञ्जूषा -** ( पीडितः, अवकाशं, निवेदनम्, भवन्तः कारणात्, सेवायाम्, आज्ञाकारी, अहम्, परामर्शम्, अक्षमः )

**उत्तरम्-** (i) सेवायाम् (ii) निवेदनम् (iii) अहम् (iv) पीडितः (v) कारणात् (vi) अक्षमः (vii) परामर्शम् (viii) अवकाशम् (ix) भवन्तः (x) आज्ञाकारी

**प्रश्न 16. अधोदत्तं चित्रं दृष्ट्वा प्रदत्तमञ्जूषापदसहायतया संस्कृते पञ्चवाक्यानि रचयत । 5**



**मञ्जूषा-** (जलाशये, बालकाः, वर्तको वनमानुषः सन्ति, जन्तव, सिंहः, ग्रीवाम्, लम्बते, पञ्जरिकायाम्, हर्षिताः, उष्ट्रः, जन्तुशाला)

**उत्तरम्-** (i) इदं चित्रं जन्तुशालायाः अस्ति।

(ii) चित्रे पञ्जरिकायां जन्तवः सन्ति।

(iii) चित्रे वनमानुषः, सिंहः, उष्ट्रः च सन्ति।

(iv) जलाशये द्वौ वर्तकौ तरतः ।

(v) बालकाः जन्तुशालां दृष्ट्वा हर्षिताः भवन्ति।।

**प्रश्न17: 'अस्माकं राज्यम्' विषयमधिकृत्य प्रदत्तमंजूषापदसहायतया संस्कृते पंचवाक्यानाम् एकम् अनुच्छेदं लिखत- 5**

**मञ्जूषा-** (राजमार्गः, झारखण्डराज्यम्, औद्योगिकम्, आरोग्यशालाः, राजधानी, उन्नतिपथम्, शिक्षालयाः, जलप्रपाताः, कार्यालयाः, रमणीया, प्रकृतिः, मुख्यमंत्री, सौविध्यम् )

**उत्तरम्-** (i) अस्माकं राज्यं झारखंड-राज्यं वर्तते।

(ii) अस्य राजधानी राँचीनगरम् अस्ति ।

(iii) अत्र अनेके जलप्रपाताः सन्ति ।

(iv) अत्र प्रकृतिः रमणीया अस्ति।

(v) अस्मिन् राज्ये राजमार्गाः, शिक्षालयाः च सुव्यवस्थिताः सन्ति।

**प्रश्न 18: अधोलिखितवाक्येषु रेखांकितपदमाधृत्य प्रश्ननिर्माणं- 5**

(i) सः <u>कृच्छ्रेण</u> भारम् उद्वहति ।

(ii) <u>धेनूनाम्</u> माता सुरभिः आसीत् ।

(iii) <u>अरयः</u> व्यायामिनं न अर्दयन्ति ।

(iv) <u>प्रकृत्याः</u> सन्निधौ वास्तविकं सुखं विद्यते ।

(v) <u>तत्वार्थस्य</u> निर्णयः विवेकेन एव कर्तुं शक्यः ।

**उत्तरम्-** (i) केन ? (ii) कासाम्/केषाम् ? (iii) के ? (iv) कस्याः ? (v) कस्य ?

Jharkhandlab.com

**प्रश्न19. अधोलिखित-वाक्यानि कथाक्रमानुसारेण पुनः लिखत-**

**(i) मयूरः कथयति - 'स्थितप्रज्ञ' इति व्याजेन बराकान्मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि।**

**(ii) सिंहः क्रोधेन गर्जति अहं वनराजः, किं न भयं जायते ?**

**(iii) सर्वे जीवाः प्रकृतिमातरं प्रणमन्ति।**

**(iv) वानरः वदति राजा तु रक्षकः भवति परं भवान् तु भक्षकः।**

**(v) एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति।**

**उत्तरम्-** (1) (v) एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति।

(2) (ii) सिंहः क्रोधेन गर्जति अहं वनराजः, किं न भयं जायते ?

(3) (iv) वानरः वदति राजा तु रक्षकः भवति परं भवान् तु भक्षकः।

(4) (1) मयूरः कथयति 'स्थितप्रज्ञ' इति व्याजेन वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि।

(5) (14) सर्वे जीवाः प्रकृतिमातरं प्रणमन्ति।

---

Jharkhandlab.com

jharkhandlab.com




झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्, राँची

Jharkhand Council of Educational Research and Training, Ranchi